इत्यक्तम्। एवञ्चैता घटिकाः पुण्यतमाः मानार्द्धादिकन्तु पुण्यमात्रमिति तस्मात्सन्ध्येत्यादि न सन्ध्यासंक्रान्तिविषयकमिति। सन्ध्यासंक्रान्तिविषयत्वे पारमार्थिकमित्यनुपपत्तेः। पुण्यमित्यनेनैव सिद्धिः। पारमार्थिकमित्यत्र कल्पतरुव्याख्यानावलोकनात् रविसंक्रम इति पाठकल्पनं कल्पनमेव। समयप्रकाशकृतापि तथा पठितत्वात्। जीमूतवाहनोऽपि कालविवेके।

"अह्नि संक्रमणे पुण्यमहः कृत्स्नं प्रकीर्त्तितम्।
रात्रौ संक्रमणे भानोर्दिनार्द्धं स्नानदानयोः॥"

इति बृहद्वशिष्ठादिवचनपर्य्यालोचनया दिवासंक्रान्तौ दिनमात्रं पुण्यं पुण्यतरास्तु विशेषविहिता नाड्यः इत्याह। अतएव तद्धृतजाबालिवृहस्पतिशातातपवचनमपि सङ्गच्छते। यथा,—

"वर्त्तमाने तुलामेषे नाड्यस्तूभयतो दश॥"

कालमाधवीयेऽपि। अह्नीत्यभिधाय प्राशस्त्यतारतम्यमुक्तम्। एवञ्च दिवासंक्रान्तौ कृत्स्नं दिनं पुण्यं षड़शीतिमुखेऽतीते इति वचनं पुण्यतरपरम् ॥*॥ ननु देवीपुराणे दिवारात्र्योः :संक्रमणे विशिष्यकालाभिधानात् सन्ध्यासंक्रान्तेः कः काल इति चेत्।

"त्रिंशन्मुहूर्त्तं कथितमहोरात्रन्तु तन्मया।"

इति विष्णुपुराणेन सन्ध्ययोः पृथगनुपादानात् दिवारात्रिसम्बन्धित्वान्मुहूर्त्तार्द्धेन तयोरन्तर्भावः तथा च दक्षः।

"अहोरात्रस्य यः सन्धिः सूर्य्यनक्षत्रवर्ज्जितः।
सा तु सन्ध्या समाख्याता मुनिभिस्तत्त्वदर्शिभिः॥"

योगियाज्ञवल्क्यः।

"ह्रासवृद्धी च सततं दिनरात्र्योर्यथाक्रमम्।
सन्ध्या मुहूर्त्तमाख्याता ह्रासे वृद्धौ समा
स्मृता॥"

वराहः।

"अर्द्धास्तमयात् सन्ध्या व्यक्तीभूता न तारका
यावत्॥"
तेजःपरिहानिरुषा भानोरर्द्धोदयं यावत्॥"

अतएव केनापि मुनिना नानादेशीयसंग्रहकारेण च सन्ध्यासंक्रान्तित्वेन विशेषो नाभिहितः॥*॥*॥ तदयं संक्षेपः। दिनसंक्रमणे कृत्स्नं दिनं पुण्यम्। षड़शीतिमुखेऽतीते इत्याद्युक्तं पुण्यतरं। मन्दा मन्दाकिनीत्यादिरूपेण त्रिचतुरादिघटिकाः पुण्यतमाः। दिनवृत्तोत्तरायणादिविहितविंशतिदण्डादीनां रात्रिप्रविष्टभागस्यापि पुण्यत्वम्। रात्रिसंक्रमणे तु कलान्यूनप्रथमार्द्धरात्रगते तद्दिवसीयशेषयामद्वयं पुण्यम्। कलाद्वयात्मकमध्यरात्रगते तद्दिवसीयतिथिरभेदे तद्दिवसीयशेषयामद्वयं पुण्यम्। भेदे तु तद्दिवसीयशेषयामद्वयं परदिवसीयाद्ययामद्वयञ्च पुण्यम्। उभयदिने पुण्यकालेऽपि पूर्व्वदिनाकरण एव परदिने तद्विहितं कार्य्यम्। तिथिभेदाभेदयोर्दक्षिणायने तद्दिवसीयशेषयामद्वयं उत्तरायणे तु परदिवसीयाद्ययामद्वयं पुण्यमिति। मध्यरात्रीयकलोत्तरशेषार्द्धरात्रसंक्रमणमात्रे तु परदिनाद्ययामद्वयं पुण्यमिति। सन्ध्यासंक्रमणे तु दिनदण्डे दिनस्य रात्रिदण्डे रात्रेर्व्यवस्थेति ॥*॥*॥ ब्रह्मपुराणे।

"शुक्लपक्षस्य सप्तम्यां यदा संक्रमते रविः।
महाजया तदा प्रोक्ता सप्तमी भास्करप्रिया॥
स्नानं दानं तपो होमः पितृदेवाभिपूजनम्।
सर्व्वं कोटीगुणं प्रोक्तं तपनेन महौजसा॥"

अत्र।

"मासपक्षतिथीनाञ्च निमित्तानाञ्च सर्व्वशः।"

इत्यनेन प्राप्ततिथ्युल्लेखे तद्विशेषणत्वेन महाजया इत्युल्लेख्यम्। संज्ञाविधेरेतदेव प्रयोजनं यत्तया निर्द्देश इत्युक्तत्वात्। एवञ्च संक्रान्तिविशेषस्य निमित्तत्वेन प्राप्तौ विषुवाद्युल्लेखोऽपि ॥*॥ स्कान्दे।

"एकान्ततो मया प्रोक्ताः कालाः संक्रान्ति-
संज्ञकाः।
नैतेषु विद्यतेऽनिष्टं यतश्चाक्षयसंज्ञिताः॥
अश्रद्धयापि यद्दत्तं कुपात्रेभ्योऽपि मानवैः।
अकालेऽपि हि तत् सर्व्वं सत्यमक्षयतां व्रजेत्॥"

मात्स्ये।

"अयने कोटिगुणितं लक्षं विष्णुपदीषु च।
षड़शीतिसहस्रन्तु षड़शीत्यामुदाहृतम्॥
शतमिन्दुक्षये पुण्यं सहस्रन्तु दिनक्षये।
विषुवे शतसाहस्रमा का-मा-वैष्वनन्तकम्॥"

आ-का-मा-वैषु आषाढ़ीकार्त्तिकीमाघीवैशाखीपूर्णिमासु। देवीपुराणे।

"रविसंक्रमणे पुण्ये न स्नायाद्यस्तु मानवः।
सप्तजन्मस्वसौ रोगी निर्द्धनश्चोपजायते॥"*॥

दीपिकायाम्।

"नाड़ीनक्षत्रदिवसे रविभौमशनैश्चराः।
संक्रान्तिं यस्य कुर्व्वन्ति तस्य क्लेशोऽभिजायते॥
गोमूत्रसर्षपैः स्नानं सर्व्वौषधिजलेन च।
विशुद्धं काञ्चनं दद्यान्नाड़ीदोषोपशान्तये॥"

नाड़ीनक्षत्राणि चाद्यदशषोड़शाष्टादशत्रयोविंशतिपञ्चविंशतयः। रत्नमालायाम्।

> "ताराबलादिन्दुरथेन्दुवीर्य्याद्
> दिवाकरः संक्रममाण उक्तः।
> ग्रहाश्च सर्व्वे सवितुर्बलेन
> महीसुताद्याः क्रमशः प्रशस्ताः॥"*॥

संवत्सरप्रदीपे।

"धुस्तूरबीजसलिलैः स्नायात् संक्रान्तिशान्तये
तथा सर्व्वौषधीभिश्च विष्णुमन्त्रांश्च संजपेत्॥
यदाह्नि मेषसंक्रान्तिस्तुलासंक्रमणं निशि।
तदा प्रजा विवर्द्धन्ते धनधान्यसमृद्धिभिः॥
कुजार्कशनिवारेण महासंक्रमणं यदा।
तदा भवेत् प्रजानाशो दुर्भिक्षादिभयं महत्॥"

षट्त्रिंशन्मतनिगमौ।

"संक्रान्त्यां पञ्चदश्याञ्च द्वादश्यां श्राद्धवासरे।
वस्त्रं न पीड़येत्तत्र न च क्षारेण योजयेत्॥
संक्रान्त्याञ्च त्रयोदश्यां पक्षान्ते नवमीदिने।
सप्तम्यां रविवारे च स्नानमामलकैस्त्यजेत्॥"

शातातपः।

"रविवारेऽर्कसंक्रान्त्यां षष्ठ्यां वै सप्तमीतिथौ।
आरोग्यकामस्तु नरो निम्बपत्रं न भक्षयेत्॥"*

कृत्यचिन्तामणौ गुणिसर्व्वस्वे च।

"चैत्रे मासि च सम्पूज्यो घण्टाकर्णो घटात्मकः।
आरोग्याय स्नुहीमूलं सक्रान्त्यां तत्र कारयेत्॥"

पूजामन्त्रः।

"घण्टाकर्ण महावीर सर्व्वव्याधिविनाशन।
विस्फोटकभये प्राप्ते रक्ष रक्ष महाबल!॥"

शिवपुराणे।

"घण्टाकर्णो गणः श्रीमान् शिवस्यातीव-
वल्लभः॥"*॥

कृत्यचिन्तामणौ।

"मसूरं निम्बपत्रञ्च योऽत्ति मेषगते रवौ।
अपि रोषान्वितस्तस्य तक्षकः किं करिष्यति॥"

संवत्सरप्रदीपे तूत्तरार्द्धं।

"मेषस्थे च विधौ तस्य नास्त्यङ्ग विषजं भयम्॥"

स्मृतिः।

"मेषादौ शक्तवो देया वारिपूर्णा च गर्गरी॥"

वारिदानमन्त्रः।

"एष धर्म्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः।
अस्य प्रदानात् सफला मम सन्तु मनोरथाः॥
वैशाखे यो घटं पूर्णं सभोज्यं वै द्विजन्मने।
ददात्यभुक्त्वा राजेन्द्र स याति परमां गतिम्॥"

पूर्णं जलेनेति शेषः। महार्णवे।

"यो ददाति हि मेषादौ शक्तूनम्बुघटान्वितान्
पितॄनुद्दिश्य विप्रेभ्यः सर्व्वपापैः प्रमुच्यते॥
विप्रेभ्यः पादुके छत्रं पितृभ्यो विषुवे शुभम्।"

पितृभ्यः पितॄनुद्दिश्य इत्यर्थः। अत्र विषुवस्य पुण्यविशेषजनकत्वेन विवक्षितत्वात् मेषादाविति विषुवसंक्रान्तिपुण्यकालपरम्। अन्यथा कालद्वयकल्पनापत्तेः॥*॥ कर्म्मोपदेशिन्यां व्यासः।

"संक्रान्त्यां पक्षयोरन्ते द्वादश्यां श्राद्धवासरे।
सायंसन्ध्यां न कुर्व्वीत कृते च पितृहा भवेत्॥"

देवीपुराणे।

"अतीतानागतो भोगो नाड्यः पञ्चदश स्मृताः।
सान्निध्यन्तु भवेत्तत्र ग्रहाणां संक्रमे रवेः॥
पुण्यपापविभागेन फलं देवी प्रयच्छति।"

भोगः पुण्यपापजननयोग्यकालः। पुण्यपापविवेचने विश्वामित्रः।

"यमार्य्याः क्रियमाणं हि शंसन्त्यागमवेदिभिः।
स धर्म्मो यं विगर्हन्ति तमधर्म्मं प्रचक्षते॥"

आगमवेदिभिः क्रियमाणमिति सम्बन्धः। तान्त्रिकास्तु।

"विहितक्रियया साध्यो धर्म्मः पुंसो गुणो मतः।
प्रतिषिद्धक्रियासाध्यः स गुणोऽधर्म्म उच्यते॥"

अत्रैकस्मिन्नेव काले पुण्यपापफलदानदर्शनात् संक्रमणपुण्यकाल एव स्नानादिवत्तैलादित्यागः एवमेव गुरुचरणाः। एकादशीप्रकरणोक्तसंक्रान्त्युपवासस्य व्रतत्वेन भावरूपत्वात् भाव-